श्रीः

श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमान् वेङ्कटनाथार्यः कवितार्किककेसरी।
वेदान्ताचार्यवर्यो मे सन्निधत्तां सदा हृदि॥

# ॥ श्री वेदान्तरामानुजमहादेशिक मङ्गळम् ॥

*This document* has been prepared by*

***Sunder Kidambi***

*with the blessings of*

श्री रङ्गरामानुजमहादेशिकन्

**His Holiness *śrīmad āṇḍavan* of *śrīraṅgam***

*This was typeset using LaTeX and the **skt** font.

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री वेदान्तरामानुजमहादेशिक मङ्गळम् ॥

विवेक वृत्त वैराग्य निधिः नित्यप्रियं वदः।
वेदान्तलक्ष्मणमुनिः सन्निधत्ताम् सदा हृदि॥ १ ॥

सूरिसूक्तसुधासिक्तवचसे विजितात्मने।
श्रुत्यन्तलक्ष्मणाख्याय देशिकायास्तु मङ्गळम्॥ २ ॥

सूरयः स्ववचोमर्मव्याख्यानाय यदात्मना।
कृपयात्रागतास्सर्वे तस्मै भवतु मङ्गळम्॥ ३ ॥

अपर्याप्तामृतासक्तचेतसे दीर्घबन्धवे।
दयार्द्रहृदयायास्तु गुरवे भूरि मङ्गळम्॥ ४ ॥

शठकोपमुनिप्रोक्तशास्त्रतत्व प्रदायिने।
प्राचेतसादि हृद्यार्थ वेत्रे प्राज्ञाय मङ्गळम्॥ ५ ॥

श्रीनाथो यामुनार्यश्च रामानुजमुनिस्तथा।
यद्रूपेणात्रावतीर्णाः तस्मै श्रेष्ठाय मङ्गळम्॥ ६ ॥

वाचोविधेयवेदान्तयुग्माय विजितात्मने।
वागधीशावताराय तस्मै विज्ञाय मङ्गळम्॥ ७ ॥

समालोडितशास्त्राय सारार्थामृतदायिने।
सद्भिर्नुताय सततं सर्वज्ञायास्तु मङ्गळम्॥ ८ ॥

विक्रमाक्रान्तलोकाय विजिताखिलचेतसे।
विनतावनदीक्षाय तस्मै वेद्याय मङ्गळम्॥ ९ ॥

वेदान्तलक्ष्मण मुनेः वेदार्थामृतवर्षिणः।
समात्तसकलार्थाय सारज्ञायास्तु मङ्गळम्॥ १० ॥

हितं कराय लोकानां स्मितपूर्वाभिभाषिणे।
श्रेयः प्रदाय सर्वेषां तस्मै हृद्याय मङ्गळम्॥ ११ ॥

कलाधराय तप्तानां कलहंसस्वराय च।
कलिताखिलसौख्याय कलिहन्त्रेस्तु मङ्गळम्॥ १२ ॥

परवादीभहरये परिव्राजकभूभृते।
परिपालितशिष्याय पारज्ञायास्तु मङ्गळम्॥ १३ ॥

स्थिरचित्ताय सततं साधुवृत्त निषेविने।
सत्सम्प्रदायसिद्धाय तस्मै सेव्याय मङ्गळम्॥ १४ ॥

मीनपुष्येऽवतीर्णाय मानमेयविवेकिने।
ज्ञानदाय च सर्वेषां तस्मै नाथाय मङ्गळम्॥ १५ ॥

विदिताखिलवेद्याय वेदान्तार्थप्रदायिने।
श्रीमद्वेदान्तरामानुजाख्याय गुरवे नमः॥ १६ ॥

नृसिंहराघवाख्येन छात्रेणेह सतां मुदे।
प्रणीतं मङ्गळमिदं तनोतु भुवि मङ्गळम्॥ १७ ॥

॥ इति श्री वेदान्तरामानुजमहादेशिक मङ्गळं सम्पूर्णम्॥